गतः नभस आकाशस्य अर्द्धभागमित्वा गत्वा प्राप्य याम्येन दक्षिणस्यां दिशि अदर्शनं याति। स एव चलकेतुः प्रयागकूलादारभ्य यावदवन्तीं पुष्करारण्यनामस्थानं तावत् नाशयेत्। उदगपि चोत्तरस्यां दिश्यपि च यावत् देविकां नदीं तावद्धन्यात्। मध्यदेशाख्यं मध्यदेशं भूयिष्ठमतिशयेन हन्यात्। अन्यानपि च स देशानिति। स चलकेतुः अन्यान् अपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचित् नाशयति न सर्व्वत्र। अस्य केतोर्दशमासान् यावत् फलपाकः। अदर्शनात् त्रिपक्षात् परतो यावद्दश मासांस्तावदशुभं फलं ददाति। कैश्चिदन्यैर्गर्गादिभिरष्टादश मासान् यावत् फलपाकः प्रोक्तः। तथा च पराशरः।

"अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्य उदितः पश्चिमेनाङ्गुलिपर्व्वमात्रां शिखां दक्षिणाभिनतां कृत्वा चलकेतुश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथोत्तरां व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्राह्मं नक्षत्रमुपसृत्य मनाक् ध्रुवं ब्रह्मराशिं सप्तर्षीन् संस्पृश्य नभसोऽर्द्धमात्रं दक्षिणमनुपरिक्रम्य अस्तं व्रजति। स स्वर्गे दारुणकर्म्मा स्वर्गप्राप्तित्वादेव वक्रात्तमभिनिहन्ति लोकमपि च। भूमिं कम्पयित्वा दश मासान् मध्यदेशे भूयिष्ठं जनपदमवशेषं कुरुते। तेष्वपि च क्वचित् क्वचित् शस्त्रदुर्भिक्षमरकव्याधिभयैः क्लिश्यात्यष्टादशमासानिति॥

तथा च गर्गः।

"क्षुच्छस्त्रमरकव्याधिभयैः संपीड़येत् प्रजाः।
मासान् दश तथाष्टौ च चलकेतुः सुदारुणः"॥*॥

ततः श्वेतकेतोर्लक्षणमाह।

"प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।
क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥
स्निग्धौ सुभिक्षशिवदौ अथाधिकं दृश्यते कनामा
यः। दशवर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतं॥

प्रागर्द्धरात्रदृश्य इति। श्वेतकेतुनामा केतुः प्राक् पूर्व्वस्यां दिशि अर्द्धरात्रकाले दृश्यते याम्याग्रो दक्षिणशिखः अन्यश्च द्वितीयः क इति कनामा केतुरपरे पश्चिमायां दिशि दृश्यते। युगाकृतिः युगसंस्थानाकारः तौ द्वावपि युगपत्तुल्यकालं सप्त दिवसान् दृश्येते। तौ च द्वावपि स्निग्धावति निर्म्मलौ दृश्यौ च सुभिक्षशिवदौ। अथ यः कनामा स यदि सप्तभ्योऽधिकं दृश्यते तदा शस्त्रप्रकोपजं संग्रामजमुपतापं जनयति।

तथा च पराशरः।

"अथोद्दालकः श्वेतकेतुर्दशोत्तरं वर्षशतं प्रोष्य भटकेतोश्चारान्ते पूर्व्वस्यां दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यस्तेनैव सह द्वितीयः कः प्रजापतिपुत्रः। पश्चिमकेन ग्रहकेतुर्यूपसंस्थायी युगपद्दृश्येत। ततस्तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीड़येते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्य्यात्। तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः"॥

अथ श्वेतस्य लक्षणमाह।

"श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतिः। विनिवर्त्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते"॥

श्वेतनामा केतुः जटाकारो जटासदृशः श्यावः कृष्णवर्णः वियत्याकाशे त्रिभागं यावद्गच्छति ततोऽपसव्यं प्रदक्षिणं वामभागे निवर्त्तते तृतीयांशावशेषाः प्रजाः कुरुते।

तथा च पराशरः।

"अथ काश्यपः श्वेतकेतु पञ्चदशवर्षशतं प्रोष्योदितः सोमसहजस्य वप्रकेतोश्चारान्ते श्यावरूक्षो नभसस्त्रिभागमाक्रम्यापसव्यं निवृत्योर्द्धं प्रदक्षिणजटाकारशिखः स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेशे आर्य्यगणा नामदो नामोदीच्यैर्भूमिष्ठस्त्रिभागशेषां प्रजामवशेषयति"॥*॥

अथ रश्मिकेतोर्लक्षणमाह।

"आधूम्रयातिशिखया दर्शनमायाति कृत्तिकासंस्थः। ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते"॥ यः केतुराधूम्रवर्णया शिखयोपलक्षितस्तथा कृत्तिकासंस्थः कृत्तिकानां समीपे दर्शनं गच्छति स रश्मिकेतुः श्वेतकेतोः सदृशं फलं धत्ते।

तथा च पराशरः।

"अथ रश्मिकेतुर्व्विभावसुजः प्रोष्यवर्षशतमावर्त्तकेतोः। उदितश्चारान्ते कृत्तिकासु धूम्रकेतुः"॥ *॥

ध्रुवकेतोर्लक्षणमाह।

"ध्रुवकेतुरनियतगतिः प्रमाणाकृतिर्भवति। विष्वक् दिव्यान्तरीक्षभौमो भवत्ययं स्निग्ध इष्टफलः॥ सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम्। गृहिणामुपस्करेषु च विनाशिनां दर्शनं याति"॥

ध्रुवेति। अनियता अनिश्चिता गतिर्गमनं प्रमाणं स्थूलसूक्ष्ममध्यभावमाकृतिः आकारो यस्य स तथाभूतः। स च विष्वक् समन्ततो भवति सर्व्वासु दिक्षित्यर्थः। स च दिव्यान्तरीक्षभौमस्त्रिविधो भवति। क्वचिद्द्विविधो नानाकारो भवति। स च स्निग्धो निर्म्मलशरीर इष्टफलः। एष च एवंविधानां विनाशिनां मुमूर्षूणां दर्शनमुदयं याति। नृपाणां विनाशिनां सेनाङ्गेषु सोपकरणेषु खलीनतोरणादिषु दर्शनं याति। देशानां विनाशिनां गृहवृक्षपर्व्वतेषु च दृश्यते। तथा गृहिणामुपस्करेषु उपस्करभाण्डेषु दर्व्वीशूर्पमार्ज्जन्यादिषु गृहतरुशैलेषु विनाशिनामेव दर्शनं याति।

तथा च पराशरः।

"अथानियतदिक्कालरूपवर्णप्रमाणसंस्थानो धूमकेतुः परा भविष्यता देशानां राज्ञां जनपदानाञ्च वृक्षपुरपर्व्वतवेश्मध्वजपताकाशस्त्रवर्म्मायुधावरणरथनागोष्ट्रपुरुषशयनासनभाण्डेषु च दृश्यते। स एव दिवि स्निग्धो विमलः प्रदक्षिणशिखो गगनागवीथीनामुत्तरेण व्रजन् सुभिक्षक्षेमारोग्यं चावहति। दशैकविंशतिद्विषष्ठिशतधा वा दर्शनमिच्छन्ति मुनयो धूमकेतोस्तस्य च प्रागुदयान्निमित्तान्यर्व्वाचीनचलनमग्नेः प्रभामत्स्यप्रधूपनं दिशां शीतोष्णविपर्य्यय इतिर्य्यक्षिबाङ्गसम्भवश्च"॥*॥

अथ कुमुदकेतोर्लक्षणमाह।

"कुमुद इति कुमुदकान्तिर्व्वारुण्यां प्राक्शिखो निशामेकाम्। दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति"॥ कुमुद इति श्वेतवर्ण इत्यर्थः। पश्चिमायां प्राक्शिखः पूर्व्वाग्रो निशामेकां दृश्यते। किलेत्यागमसूचने। स च दृष्टो दश वर्षाण्यतुलमसमं सुभिक्षं करोति। तथा च पराशरः। "अथामृतजः कुमुदो मणिजश्चो भवः पद्मः आवर्त्तः सम्वर्त्तः शङ्खो हिमो रूक्षः कुक्षिः फलो विसर्पणः शीतश्चेति। तत्र कुमुदकेतुर्व्वसाकेतोश्चार्द्धसमाप्तौ वारुण्यां दर्शनमुपैति। गोक्षीरविमलस्निग्धप्रभां पूर्व्वाभिगतां शिखां कृत्वैकरात्रिचरः स दृष्ट एव सुभिक्षमुत्पादयति दश वर्षाणि प्रजानामविरोधश्च। प्रतीच्यानाञ्च मुखरोगारोचकप्रतिश्यायपाण्डुरोगज्वरैः प्रजानां बाधत इति"॥*॥

अथ मणिकेतोर्लक्षणमाह।

"सकृदेकयामदृश्यो सुसूक्ष्मतारः परिणमति मणिकेतुः। ऋज्वी शिखाऽस्य शुक्ला स्तनोद्गता क्षीरधारेव॥ उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्। प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्"॥ सकृदिति। मणिकेतुः स च पश्चिमायां दिशि सूक्ष्मतारोऽल्पतारकः सकृदेकवारमेकयामदृश्यः। यामशब्देन रात्रिचतुर्भागः। अस्य केतोरृज्वी स्पष्टा शिखा चूड़ा श्वेतवर्णा दृश्यते। कीदृशी स्तनोत्था क्षीरधारेव स्तनात् निःसृता क्षीरधारा यथा दृश्यते तद्वत्तच्छिखा। उदयन्नेवेति। असौ केतुरुदयन्नेवोदितमात्र एव चतुरः सार्द्धानर्द्धानपञ्चमासान् सुभिक्षं क्षेममुत्पादयति। प्रायो बाहुल्येन क्षुद्रजन्तूनां नकुलादीनां प्रादुर्भावमुत्पत्तिं करोति।

तथा च पराशरः।

मणिकेतुरपि कपालकेतोरवसाने प्रतीच्यामुदयं याति। स तु सूक्ष्मतारकः श्वेतवर्णया क्षीरप्रसेकया पूर्व्वाभिनतया शिखया शर्व्वर्य्यामेकयामदृश्यः। स उदयात् प्रभृति पञ्च मासान् क्षेमं सुभिक्षमुत्पादयति॥ क्षुद्रजन्तूनां प्रादुर्भावं करोत्यतिमात्रकालदृष्टः"॥*॥

अथ जलकेतोर्लक्षणमाह।

"जलकेतुरपि च पश्चात् स्निग्धः शिखयाऽपरेण चोन्नतया। नव मासान् सुभिक्षं करोति शान्तिञ्च लोकस्य"॥ पश्चात् पश्चिमायां दिशि दृश्यते अपरेण पश्चिमेन चोन्नतया उच्चया शिखया युक्तः। स च दृष्टः नवमासपर्य्यन्तं सुभिक्षं करोति लोकमङ्गलकरश्च। तथा च पराशरः। "अथ जलकेतुः पैतामहः यस्य चलकेतोर्नवमासावशिष्टे कर्म्मणि कृते प्रवर्त्तयति। पश्चिमेनोदितः स्निग्धः सुजातोऽनुपश्चिमाभिनतः। स च शिखी नवमासान्तात् क्षेमसुभिक्षारोग्याणि प्रजाभ्यो धत्ते।